National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 12-15
© 2026 NJHSR
www.sanskritarticle.com

**अजयतन्तुवायः**
शोधछात्रः,
बाँकुडाविश्वविद्यालयः,
बाँकुडा, पश्चिमवङ्गः

**Correspondence:**
**अजयतन्तुवायः**
शोधछात्रः,
बाँकुडाविश्वविद्यालयः,
बाँकुडा, पश्चिमवङ्गः

# पञ्चाननतर्करत्नविरचिते अमरमङ्गलम् इति नाटके नाटकलक्षण-विमर्शः

**अजयतन्तुवायः**

**शोधसंक्षेपः -** दृश्यश्रव्यभेदेन संस्कृतकाव्यसाहित्यं प्रधानतया द्विविधम्। रसवोधयुक्तं रसिकजनानां समीपे अभिनयमाध्यमेन सुचारुरूपेण यस्य उपस्थापनं क्रियते - तदेव दृश्यकाव्यमिति उच्यते। दृश्यकाव्यस्य वहवः भेदाः स्थिते सति साधारणतया अस्माभिः अभिनयमाध्यमेनउपस्थापितं दृश्यकाव्यं नाटकमिति कथ्यते। संस्कृतनाट्यसाहित्यस्य वहवः भेदाः परिलक्षते। तेषु भेदेषु एकं विशेषभेदं हि नाटकम्। नाट्यशास्त्र-प्रणेता भरतात् आरभ्यः सर्वे नाट्यशास्त्रकाराः स्वकीये ग्रन्थे स्व स्व मतानुसारेण नाटकलक्षणं आलोचनं कृतवन्तः। महाकविकालिदासादि प्रथितयशाः नाट्यकाराः नाट्यशास्त्रस्य नियमानुसारेणैव तेषां नाटकानि रचितवन्तः। आधुनिकिकाले ये तावत् पण्डिताः नाटकं रचयित्वा नाट्यकाररूपेण प्रसिद्धिः अलभत् तेषु पण्डितेषु श्रीपञ्चाननतर्करत्नासीद्न्यतमः। तस्य अमरमङ्गलमिति नाटकं सर्वजनविदितः समादृतश्च। पण्डितपञ्चाननतर्करत्नस्य अमरमङ्गलम् नाटकमिदं नाट्यशास्त्रदिशा दोषरहितं सफलनाटकं न वेति इति  मम विचाराभिलाषः।

**सूचकशव्दसमूहाः** - अभिनयः, दृश्यकाव्यम्, दृश्य-श्रव्य, नाट्यशास्त्र, नाट्यशास्त्रकाराः

दृश्यकाव्यस्य बहुषु भेदेषु सत्स्वपि साधारणतया अभिनयेन उपस्थापितं दृश्यकाव्यं नाटकमिति अस्माभिः कथ्यते। रूपकोपरूपकादिभेदेन संस्कृतनाट्यसाहित्यस्य साकल्येन अष्टाविंशतिभेदाः दृश्यन्ते। तेषु भेदेषु एको विशेषभेदो हि नाटकम्। प्रसङ्गेऽस्मिन् उल्लेख्यं यत् नाटकं हि नाट्यसाहित्यस्य नाटकेतरभेदानां 'प्रकृतिः' इत्युच्यते। अष्टाविंशतिभेदेषु केवलं नाटके सर्वविधः रसपरिग्रहः दृश्यते। नाट्यशास्त्रप्रणेतुः आचार्यभरतात् आरभ्य सर्वे नाट्यशास्त्रकाराः स्वकीये नाट्यग्रन्थेषु स्व-स्व-मतानुसारं नाटकलक्षणं तस्य स्वरूपवर्णनं च कृतवन्तः। नाट्याचार्यभरतः तस्य नाट्यशास्त्रे नाटकस्वरूपमाह -

> **'प्रख्यातवस्तुविषयं प्रख्यातोदात्तनायकं चैव ।**
> **राजर्षिवंशचरितं तथैव दिव्याश्रयोपेतम् ॥**
> **नानाविभूतिभिर्युतमृद्धिविलासादिभिर्गणैश्चैव ।**
> **अङ्कप्रवेशकाढ्यं भवति हि तन्नाटकं नाम ॥**
> **नृपतिनां यच्चरितं नानारसभावचेष्टितं वहुधा ।**
> **सुखदुःखोत्पत्तिकृतं भवति हि तन्नाटकं नाम ॥' इति ।**[1]

महाकविकालिदासादिप्रथितयशस्काः नाट्यकाराः नाट्यशास्त्रस्य नाटकलक्षणादिनियमानुसारेणैव तेषां नाटकानि रचितवन्तः। प्राचीनकालात् अद्यापि नाट्यशास्त्रस्य नाटकस्य वा नित्यप्रवहमानाधारा प्रवाहिता वर्तते। आधुनिकिकाले ये तावत् पण्डिताः नाटकं रचयित्वा नाट्यकाररूपेण प्रसिद्धिम् अलभन् तेषु पण्डितेषु श्रीपञ्चाननतर्करत्नः अन्यतम आसीत्। पण्डितपञ्चाननतर्करत्नानाम् अमरमङ्गलम् इति कलङ्कमोचनमिति च नाटकद्वयं वर्तते। एतयोः नाटकयोः 'अमरमङ्गलम्' सर्वजनविदितं समादृतञ्च। अधुना नाट्यशास्त्रदिशा पण्डितपञ्चाननतर्करत्नानाम् 'अमरमङ्गलम्' इति नाटकसमीक्षणे मे प्रवृत्तिः।

प्रसङ्गेऽस्मिन् उल्लेख्यं यत् कार्येऽस्मिन् उपजीव्यग्रन्थरूपेण विश्वनाथकविराजस्य 'साहित्यदर्पणः' इति ग्रन्थः स्वीकृतः मया।

साहित्यदर्पणकारेण आचार्यविश्वनाथकविराजेन तस्य 'साहित्यदर्पणः' इति ग्रन्थे नाटकलक्षणमुक्तम् -

**'नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।**
**विलासद्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥**
**सुखदुःखसमुद्भूतिनानारसनिरन्तरम् ।**
**पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥**
**प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान् ।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः ॥**
**एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।**
**अङ्गमन्ये रसाः सर्व्वे कार्य्यं निर्वहणेऽद्भुतम् ॥**
**चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपुरुषाः ।**
**गोपुच्छाग्रसमाग्रन्तु वन्धनं तस्य कीर्तितम् ॥ '** इति[2]

श्रीपञ्चाननतर्करत्नस्य 'अमरमङ्गलम्' इति नाटकश्रेण्याः रूपकं इति नाट्यकारेण श्रीतर्करत्नेन स्वेनैव उल्लिखितम्- 'श्रीपञ्चाननतर्करत्नभट्टाचार्य्येण अमरमङ्गलं नाम नाटकमभिनिर्माय सद्यः प्रयोक्तुमस्मभ्यमर्पितम् ' इति (प्रस्तावनायां सुत्रधारः)। अमरस्य मङ्गलम् इति षष्ठीतत्पुरुषसमासे अमरमङ्गलम्। अमरस्य नाम उदयपुराधिपतेः अमरसिंहस्य, मङ्गलं नाम युद्धविजय-चितोराधिकारादि वृत्तम् अस्य नाटकस्य वर्णनीयविषयः। अधुना साहित्यदर्पणोक्तनाटकलक्षणं अमरमङ्गलनाटके संगतं भवति न वेति विचार्यते।

नाटकलक्षणस्य आदौ उक्तं - 'नाटकं ख्यातवृत्तं स्यात् '। नाटकवृत्तान्तं रामायण-महाभारतप्रसिद्धमिव इतिहास-पुराणादि प्रसिद्धम् अथवा लोकविश्रुतं लोकवृत्तं वा भवेत् इति तदर्थः। अमरमङ्गलस्य वृत्तान्तम् इतिहासप्रसिद्धस्य मेवारप्रदेशस्य शिशोदियावंशस्य वृत्तान्तम्। अतः अमरमङ्गलस्य वृत्तम् इतिहासप्रसिद्धं ख्यातवृत्तम् एव , न तु कविकल्पितम्।

पुनः अलंकारशास्त्रादिग्रन्थे नाटकस्य अन्यतमलक्षणरूपेण पञ्चसन्धेः सद्भावस्य उल्लेखो दृश्यते। पञ्चसन्धयः यथाक्रमं मुखः , प्रतिमुखः , गर्भः , विमर्शः अवमर्शः वा , निर्वहणः उपसंहृतिः वा च इति। बीज-विन्दु-पताका-प्रकरी-कार्यैः पञ्चार्थप्रकृतिभिः सह यथाक्रमम् आरम्भ-यत्न-प्राप्ताशा-नियताप्ति-फलागमानां पञ्चकार्या-वस्थानां संयोगात् मुखादि-पञ्चनाट्यसन्धीनां सृष्टिः भवति।

'अमरमङ्गलम्' इति नाटके मुखादि-पञ्चसन्धेः सुष्ठु-प्रयोगः परिलक्ष्यते । प्रथमाङ्के राज्ञः अमरसिंहस्य शालुम्ब्रापतिना सह सर्वेषां सामन्तानां सम्मतिग्रहणपूर्वकं शत्रूणां यवनानां प्रचेष्टायाः विफलतासम्पादनं , चितोरपुनरुद्धारस्य उपायलाभविचार इच्येतैः वृतैः मुखसन्धिः सूचितः। राठौरवंशस्य राज्ञः राजसिंहस्य कन्या इति कपट परिचयेन परिचितायाः वाराङ्गनावीरायाः हृदये राणौपधिकं अमरसिंहं प्रति प्रेमसञ्चारः, दस्युछद्मवेशधारिणां यवनानां रहसि वधेन शत्रुप्रयत्न वैफल्य सम्पादनवीजम्। शत्रोः परिकल्पनां ज्ञात्वा शत्रुपरिकल्पना वैफल्य सम्पादनम् इत्यत्र प्रतिमुखसन्धिः। तृतीयाङ्के शुकपक्षीमुखे-निन्दावाणीश्रवणेन पुरोहितशैलदेवसंवादेन च मानसिंहस्य उदयपुरात् अपसारणेन गर्भसन्धिः सूचितः। द्वितीयाङ्के अमरसिंहः युद्धार्थं सर्वेषां सामन्तानां सम्मतिलाभाय प्रयासः कृतः, किन्तु सामन्ताः सम्मतिः न दत्तवन्तः। चतुर्थाङ्के अमरसिंहः सामन्तानां सम्मतिग्रहणार्थं व्यसनासक्तस्य अभिनयं कृतवान्। तस्य अभिनयदर्शनेन गर्भसन्धिः सूचितः। वीराया पलायने देव्याः औदासीन्येन युद्धे वहुसैन्यक्षयेण शक्तचण्डवंशवैरेण च सान्तरायः इति षष्ठाङ्के विमर्शसन्धिः। अष्टमाङ्के नाटकस्य प्रधानफललाभे चितोरोद्धारकर्मसम्पादने निर्वहनसन्धिः सूचितः।

अथ 'सुखदुःखसमुद्भुतिनानारसनिरन्तरम्' नाम नाटके सुखदुःखयोः उत्पत्तेः वर्णनं भवेत्। 'अमरमङ्गलम्' इति नाटकस्य प्रथमाङ्कात् आरभ्य सर्वत्र सुखदुःखयोः वर्णनम् अस्ति। यथा पञ्चमाङ्के अमरसिंहस्य समरविजये सर्वेषां विजयोल्लासः , पुनः षष्ठाङ्के वीरायाः अतर्कित-पलायने राजमहिषीदेव्या दुःखस्य वर्णनं दृश्यते। तया उक्तं - ' सा हि मम द्वितीयं हृदयम् आसीत् । तस्याः अतर्कितेन अदर्शनेन परिभूतमिव आत्मानं पश्यामि ' इति। अपि च समग्रं अमरमङ्गलनाटकं शृङ्गार-वीर-हास्यादि रसपरिपूर्णम्। नाट्यशास्त्रानुसारं नाटकस्य पञ्चतः दशाङ्काः भवन्ति । नाटकस्य अङ्कसंख्या पञ्चन्यूना तथा दशाधिका कदापि न भवेत्। उक्तञ्च साहित्यदर्पणे - 'पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः' इति। पञ्चाननतर्करत्नस्य नाटकमेतत् अष्टाङ्कयुतं नाटकम्। तत्र अपसर्पनाभिधः प्रथमाङ्कः, मन्त्रणाभिधो द्वितीयाङ्कः, मानसिंहोद्वेजभिधः तृतीयाङ्कः, समरयात्रोद्योगः इति चतुर्थाङ्कः, समरजयः इति पञ्चमाङ्कः, चितोरप्रवेशोपायलाभः इति सप्तमाङ्कः, चितोरोद्धारः इति अष्टमाङ्कः इति अष्टौ अङ्काः।

तदनु नाटकस्य नायकप्रसङ्गे अलंकारशास्त्रस्य निर्देशः प्राप्यते। नाटकस्य नायकः विख्यातवंशोद्भूतः, राजर्षिः, धीरोदात्तगुणसम्पन्नः प्रतापवान् दिव्यः अदिव्यः वा भवेत् -

**'प्रख्यातवंशो राजर्षिधीरोदात्तः प्रतापवान् ।**
**दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः ॥ ' इति**

विधानानुसारेण नाटके नायकः धीरललितः अथवा धीरप्रशान्तः अथवा धीरोदात्तः अथवा धीरोद्धतः भवेत् । 'अमरमङ्गलम्' इति

नाटकस्य नायकः धीरोदात्तः। साधारणतया 'धीर' शब्देन आत्मनियन्त्रणकारी, यः समूहविपदि अपि मुह्यमानः न भवति स बोध्यते। यः धैर्यसहकारेण विपदः मुक्तेः उपायसन्धानं करोति स धीरोदात्तः। दशरूपके धनञ्जय आह -

**' महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।**

कामादि-रिपुभिः यस्य अन्तःकरणं अभिभूतं न भवति, यः आत्मप्रशंसापराङ्मुखः, यस्य गर्वभावः विनयावृतः, यः अतिगम्भीरप्रकृतिविशिष्टः, धैर्य्य-स्थैर्य्यगुणसम्पन्नः, दृढव्रतः स एव धीरोदात्तः ।

अमरमङ्गलनाटके नायकस्य अमरसिंहस्य चरित्रे अलंकार-शास्त्रोक्तगुणानां सर्वेषां सम्यग्रूपेण परिस्फुटनं दृश्यते। अमरसिंहः मेवारप्रदेशस्य विश्वविश्रुतशिशोदिया वंशोद्भूतः राजर्षि-गुणसम्पन्नः प्रतापवान् अदिव्यनायकः। यद्यपि अमरसिंह इत्येकम् ऐतिहासिकं चरितं तथापि नाट्यकारेण अभिनवत्वसम्पादनार्थं नायकचरिते किञ्चित् संयोजनं कृतम्। नाट्यकारकृत इदं संयोजनं न तु नाट्यशास्त्रनिन्दितम् अपि तु विधिविहितम् एव। साहित्यदर्पणे विश्वनाथकविराजेनोक्तम् -

**'यत् स्यादनुचितं वस्तु नायकस्य रसस्य वा ।**

**विरुद्धं तत् परित्याज्यमन्यथा वा प्रकल्पयेत् ॥' इति ।**[4]

नाटके नायकस्य रसस्य विषये अनुचितविषयाणां परित्यागः , पुनः उचितविषयाणां भिन्नप्रकारेण कल्पना इति विषये नाट्यकारस्य स्वातन्त्र्यं विद्यते। अत्र नाट्यकारेण श्रीतर्करत्नेन अमरसिंहचरितस्य उतकर्षतासम्पादनार्थम् 'अन्यथा वा प्रकल्पयेत्' इति आलंकारिकनिर्देशानुसारेण नायकचरिते व्यसनादिविषयः वर्णितः। विषयेऽस्मिन् नाट्यकारेण पञ्चाननतर्करत्नेन स्वयमेव भूमिकांशे उक्तम्- "अत्र नायकीकृतस्यामरसिंहस्य चरितोतकर्षसम्पादनाय 'अन्यथा वा प्रकल्पयेत्'- इत्यालङ्कारिकनिर्देशमङ्गीकृत्य तस्य व्यसनादिकम हि कृत्रिमं प्रयोगविशेषविजृम्भितमिति नाटकेऽस्मिन्नुपवर्णितम् " इति। एवं चरित-विश्लेषणेन दृश्यते यत् अमरमङ्गलस्य नायकचरितचित्रणे नाट्यकारः तर्करत्नः सफलः। अनन्तरं नाटकस्य रसप्रसङ्गे आचार्यविश्वनाथेनोक्तम् -

**'एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।**

**अङ्गमन्ये रसाः सर्व्वे कार्यं निर्वहणेऽद्भूतम् ॥' इति ।**

अर्थात् शृङ्गाररसः वीररसः वा नाटकस्य प्रधानरसः अङ्गी रसः वा भवेत् । इतोऽपि अन्ये सर्वे रसाः अङ्गरसरूपेण अवश्यमेव स्थास्यन्ति। निर्वहणसन्धौ अद्भूतरसस्य प्रयोगः भवेत्। अस्य नाटकस्य नायकः अमरसिंहः मातृभूमेः मेवारप्रदेशस्य उद्धारार्थं रक्षार्थं च दृढप्रतिज्ञः । नाटकस्य वृत्तानि तस्मिन् लक्ष्ये धावमानानि वर्तन्ते, तदर्थं मन्त्रणा-युद्धादि-वीरोचितकार्यावली आलोचिता। अतः 'अमरमङ्गलम्' इति नाटकस्य अङ्गी रसः वीररसः एव। आचार्यभरतस्य मतानुसारेण वीररसः उत्तमप्रकृतिविशिष्टः उत्साहात्मकः च। अलंकारशास्त्रादिषु ग्रन्थे वीररसस्य स्थायिभावरूपेण उत्साहस्य उल्लेखः दृश्यते। नाटके वीररसस्य उदाहरणं यथा- नाटकस्य पञ्चमाङ्के युद्धक्षेत्रे सैन्यान् परिचालयन्तं राजानम् अमरसिंहं दृष्ट्वा शालुम्ब्रापतिः भणसिंहम् उक्तवान् -

**'भणसिंह! प्रीतिविस्मयविस्फारितेन चक्षुषा पश्यामि –**

**अहो दृशं राज्ञो रणशिरसि नैपुण्यमतुलं**
**परः पश्चाच्चान्ते इह समदृष्टिर्विचरति ।**
**विजित्यास्त्रग्रामं परपरिगृहीतं निजवलै**
**र्निरुन्धन् शत्रुणामपगमपथं यो विजयते ॥ ' इति ।**[5]

संग्रामभूमौ राज्ञः अमरसिंहस्य अनुपमं रणनैपुण्यम् अत्र वर्ण्यते । एवमेव समग्रे नाटके मुख्यरूपेण वीररसस्य प्राधान्यं दृश्यते । पुनः अङ्गरसरूपेण शृङ्गाररसस्य हास्यरसस्य च परिस्फुटनं दृश्यते । शृङ्गाररसस्य प्रकाशः प्रथमाङ्के एव दृश्यते। महाराजामरसिंहं दृष्ट्वा वीरायाः अनुरागस्य प्रकाशः - 'असमर्थासि आत्मानं धारयितुम् ' इति। पुनः सलज्जां वीरां दृष्ट्वा राज्ञः अमरसिंहस्य अनुरागानुभूतिः -

**'इयं हि प्रणयोद्वेगगोत्रस्खलनलज्जया ।**

**न केवलं निजाङ्गेषु मम चित्तेऽपि लीयते ॥' इति ।**[6]

द्वितीयाङ्के विष्कम्भकांशे दैवज्ञेन सह वृद्धस्य कथोपकथने हास्यरसस्य परिस्फुटनं दृश्यते। तत्र दैवज्ञं प्रति वृद्धस्य परिहासोक्तिः -

**'तापं कृशानौ सलिलं समुद्रे**
**शैत्यं तुषारे सुषमां शशाङ्के ।**
**वृक्षानरण्ये चलनञ्च वायौ**
**वदाम्यशेषं गणना प्रभावात् ॥ ' इति ।**[7]

अतः रसप्रयोगे 'अमरमङ्गलम्' इति नाटके अलंकारशास्त्रस्य विधानम् - ' एक एव भवेदङ्गी शृङ्गारो वीर एव वा / अङ्गमन्ये रसाः सर्वे ' इति सुष्ठुरूपेण प्रयुक्तं नाट्यकारेण। नाटके नायकं विहाय, कार्यसाधनार्थं चत्वारः पञ्च वा पुरुषाः भवेयुः। अस्मिन्नाटके चितोरोद्धाररूपमुख्यकार्यसाधनार्थं नायकस्य अमरसिंहस्य सहायकरूपेण शालुम्ब्रापतिः, भणसिंहः, वान्दाठक्कुरः, शैलदेवः इत्येतेषां प्रमुखानाम् उपस्थितिः योगदानम् च अनस्वीकार्यम्।

उपर्युक्तविषयविश्लेषणेन वक्तुं शक्यते यत् श्रीतर्करत्नमहोदयः अलंकारशास्त्रे नाट्यशास्त्रे च निष्णातः आसीत् । नाटकलक्षणविषये

नाट्यशास्त्रीयाः अलंकारशास्त्रीयाः च सर्वे सिद्धान्ताः तेन सम्यग्रूपेण परिपालिताः। अतः नाट्यशास्त्रदिशा ‘अमरमङ्गलम्’ एकं सार्थकं तथा सर्वाङ्गसुन्दरं नाटकम् इति निर्द्विधं वक्तुं शक्यते ।

अत्रास्मिन्नाटके साहित्यदर्पणोक्तं यत् नाटकलक्षणं तत् कथं संगतं भवति इति प्रवन्धेऽस्मिन् प्रदर्शितम्। तत्रापि नाटकलक्षणस्य प्रसिद्धांशाः सोदाहरणं सोद्धृति च समीक्षिता अत्र। तत्र कथं ख्यातवृत्तत्वम् अस्य प्रकृतनाटकस्य सम्भवति इति सयुक्ति निरूपितम्। सन्धीनाम् अपि विचारः उद्धृतिपुरस्सरमत्र समीक्षितो मया। तदनन्तरं नाटकस्य मुख्या अंशा अपि अत्र पर्यालोचिताः , यथा नाटके अङ्काः कियन्तः सन्ति इति नाट्यशास्त्रीयानुसारं विचारितमत्र। नाटकरसः अपि अत्र चर्चितः। एवञ्च ख्यातवृत्ताश्रितास्यापि अस्य नाटकस्य कथं मौलिकत्वम् अभिनवत्वं वा वर्तते तदपि मया सयुक्ति यथामति अत्र प्रतिपादितम् । उपसंहृतौ अयं मे विचारः यत् वङ्गीयः अयं प्रथितयथा-नाट्यकारः सत्सु अपि नैकेसु अलंकारशास्त्रेषु वङ्गप्रसिद्धं विश्वनाथकविराजरचितं साहित्यदर्पणमाश्रित्यैव ‘अमरमङ्गलम्’ इति नाटकं पञ्चाननतर्करत्नेन ग्रथितमिति। तत्र च यथा नाट्यशास्त्रविधानानि परिपालितानि तथा स्वकीयम् अभिनवत्वमपि ग्रथितं नाट्यकारेण इत्यलम् ॥

- **सन्दर्भग्रन्थसूचीः**


1. तर्करत्नभट्टाचार्य्यः, पञ्चानन, सम्पा. गुरुपदहालदार, शक्तिभाष्यम्, कालीघाट समिति, १८६० शकाब्दाः , Print.
2. तर्करत्नभट्टाचार्य्यः, पञ्चानन, सांख्यदर्शनम्, तृतीयसंस्करणम्, वङ्गवासी, कलिकाता, Web.
3. पाहाडी, अन्नदाशङ्करः, अमरमङ्गलम्, संस्कृत वुक डिपो, कलकाता,२०१७, Print.
4. वन्द्योपाध्याय,सुरेन्द्रनाथ,संस्कृतसहित्ये वाङालिर दान, प्रथम-संस्करणम्, संस्कृतपुस्तकभाण्डार, कलकाता,१९६२, Print.
5. उपाध्याय,रामजी, आधुनिकसंस्कृतनाटक, चौखाम्बा विद्याभवन, वाराणसी,१९९६, Print.
6. उपाध्याय,वलदेव,संस्कृत-वाङ्मय का-वृहद् इतिहास(सप्तम खण्ड),उत्तरप्रदेश संस्कृतसंस्थानम्, लखनऊ,२००० ई , Web.
7. त्रिपाठी, राधावल्लभ, संस्कृतसाहित्य : बींसवी शताब्दी, राष्ट्रियसंस्कृतसंस्थानम्, १९९९ ,Print.
8. विद्यानिधि, गुरुनाथ, श्रीमद्विश्वनाथ-कविराज-प्रणीतः साहित्य-दर्पणः, सदेश,कोलकाता, २०१२, Print.
9. चतुर्वेदी, ब्रजमोहन, भरतमुनिप्रणीत नाट्यशास्त्रम्, विद्यानिधि प्रकाशन, दिल्ली, २०१४, Print.
10. शास्त्री, श्रीनिवास,श्रीधनञ्जयविरचितं दशरूपकम्, साहित्य भाण्डार, मेठर, १९९४ , Web.
11. चक्रवर्ती, सत्यनारायण, अभिज्ञान-शकुन्तलम्, संस्कृत पुस्तक भाण्डार, कोलकाता, २०१२, Print.


**पाद टिप्पणी: -**

[1] नाट्यशास्त्र , १८. १०-१२

[2] साहित्यदर्पणः , ६.६

[3] दशरूपकम् , २.४

[4] साहित्यदर्पणः , ६.५०

[5] अमरमङ्गलम् , ५.१५

[6] अमरमङ्गलम् , १.२०

[7] अमरमङ्गलम् , २.४